# BACHELOR OF ARTS EXAMINATION, 2025

(1st Year, 2nd Semester)

SANSKRIT

Subject Code : CBCS/SAN/UG/CORE/2.2(OLD)

SANSKRIT DRAMA

*Time : Two Hours* *Full Marks* : 30

*The figures in the margin indicate full marks.*

## क-विभागः

१. अधोलिखिताः प्रश्नाः सुरगिरा देवनागरीलिपिमाश्रित्य समाधेयाः ।

क. नृपाय आरण्यकाः कीदृशं करं ददति ? 1

ख. का नाम 'वनज्योत्स्ना' ? 1

ग. मृगयायाः गुणजातं वाक्यद्वयेन लिख्यताम् । 2

घ. अभिज्ञानशकुन्तलमिति नाटके विदूषकस्य नाम किम् ? तस्य विषण्णतायाः कारणं किमासीत् ? 1+1

ङ. नाटकस्यास्य द्वितीये अङ्के तस्य चरित्रोपस्थापनेन किं नाटकीयं तात्पर्यं साधितं कविना ? 2

२. सप्रसङ्गं व्याख्या कार्या – 7

इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति ।।

अथवा

न खलु न खलु बाणः संनिपात्योऽयमस्मि-
न्मृदुनि मृगशरीरे पुष्पराशाविवाग्निः ।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता बज्रसाराः शरास्ते ॥

## ख–विभागः

१. अधोलिखितेषु द्वौ प्रश्नौ सुरगिरा देवनागरीलिप्या च समाधेयौ– 4X2= 8

क) 'आर्यपुत्रोऽपि नाम परकीयः संवृत्तः'–वाक्यमिदं कया कस्मिन् प्रसङ्गे च उक्तम् ? 'परकीयः' शब्देनात्र कः सूचितः? 'संवृत्तः' इत्यस्य प्रकृति–प्रत्ययौ लेखनीयौ। 1+1.5+0.5+1= 4

ख) 'अभित इव तेऽद्य वरमुखं पश्यामि' –कामुद्दिश्य कया च इदमुक्तम्? कदा एवमुक्तम्? 'वरमुखमि'त्यस्य अर्थो देयः ? 1+2+1= 4

ग) 'लावाणकसंकीर्त्तनेन पुनर्नवीकृत इव मे सन्तापः'– 'मे'-शब्देनात्र का सूचिता ? कदा एवमुक्तम्? वाक्यस्यास्य तात्पर्यं देयम् । 0.5+1.5+2= 4

2. 'स्वप्नवासवदत्तम्' इति नाटकस्य प्रथमाङ्के तपोवनस्य यच्चित्रं सुप्रकटितं जातं, तथा वर्ण्यताम् । 7

अथवा

"गुणानां वा विशालानां सत्काराणां च नित्यशः ।

कर्त्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः ॥" - कमुद्दिश्य केन चेदमुक्तम्? श्लोकस्यास्य सप्रसङ्गं तात्पर्यं लिख्यताम् । 1+1+5= 7

*****